# युधिष्ठिरस्य मनोव्यथा
## ( नाटिका)

— डॉ॰ सत्यपाल श्रीवत्सः

अहं न जाने, के के मयाऽपराधाः कृता द्रौपद्या सह मम भ्रातृभिश्च, यैरहं प्रेषित एतस्मिन् घोरतमे नरके। अयमवश्यमेव कस्यचिद्दुष्कर्मण एव परिपाकः। यदा मयासौ पापी दुर्योधनः स्वर्गे रत्नखचितसिंहासने उपविशन् दृष्टस्तदा मम हृदयमीर्ष्याज्वालया ज्वलितमिवासीत्। कीदृशीयं विडम्बना माया वा ?

अस्माभिर्युद्धं धर्मरक्षार्थं तथा च स्वाधिकाराणां प्राप्त्यर्थमेव कृतम्। तेन नीचेन दुर्योधनेन किं पुण्यमर्जितं येनासौ स्वर्गं प्रेषितः।

तस्य घोर-नरकस्य स्मरण-काल एव मम हृदयं वेपते बुद्धिश्च भ्रमति। तत्र मयातीव बीभत्सं दृश्यमवलोकितं येनाहं भृशं कम्पित आसम्। मम कण्ठश्च रोरुध्यमान आसीत् । तत्र सर्वत्रातीवाऽसह्यं - दुर्गन्धं विहाय न किञ्चिदप्यासीत्। ओः ! ओः ! कीदृशं भयङ्करं दृश्यमासीत्तत्। यावदहं समग्रं दृश्यं नावलोकयितुं समर्थो जातस्तावत्तत्र सहसा घोरतमोऽन्धकारो व्याप्तः। एतत् कथमभूत् ? कीदृशमभूत् ? केन च कृतम्, इत्यहं न जाने।

तदाहं तस्मिन्नेवान्धकारेऽग्रे प्रचलितः। परं तत्रानेकान् करुणार्द्रान् शब्दान् श्रुत्वा मम शरीरे वेपथुः रोमहर्षश्च प्रावर्तत। ते सर्वे माम्-आह्वयन्तः इवासन् तत्रैव निवस्तुम्। 'अहं कर्णः, अर्जुनोऽहम्, अहं भीमः, अहमेव द्रौपदी' - इत्यादयोऽनेके ध्वनयः सर्वतः श्रूयन्ते स्म। भोः ! क्व यामि ? किं करोमि ? पतितोऽहं घोरतमे दुःखसागरे। ओः ! इमानि कीदृशानि भयावहानि दृश्यानि मम पुरतः आयान्ति साम्प्रतम् ! तद् भयङ्करं युद्धं महाभारतन्नाम ! ओः ! किमिदं श्रूयते ? नाहं पारयामि श्रोतुम् ! नाहं पारयामि ! रक्ष भोः, रक्ष माम्।

स्मरामि, तद्-युद्धानन्तरं महर्षिर्नारदो मां पृष्टवान्-वत्स युधिष्ठर, अपि प्रसन्नोऽसि त्वमिदं राज्यमवाप्य ? इदमपि च स्मरामि, यन्मयोत्तरितम्-देवर्षे, कथमहन्तुष्टः ? पापपूर्णं रुधिरस्नातञ्चेदं राज्यं यत् प्राप्तं मयाऽजस्र-रक्त-पातानन्तरम् ! अष्टादशाऽक्षौहिणीनां विनाशः। अस्माकं ज्येष्ठो भ्राता वदान्यतरः कर्णस्तत्रैव घातितः, चरित्रवान् वीरश्चास्माकं पितामहो भीष्मोऽपि स्वर्गगमितस्तत्रैव। युद्धविद्यानिष्णातोऽस्माकं गुरुवर्य आचार्यो द्रोणोऽपि तत्रैव हतः। शान्तं पापम् ! शान्तं पापम् ! असौ बालोऽभिमन्युरपि कालकवलितो जातस्तत्रैव ! अहो! जघन्योऽपराधः ! अन्ये च बहवो वीरा अपि पञ्चत्वं गतास्तस्मिन्नेव घोरे संग्रामे।

भोः ! महामुने ! – कीदृशं घोरतममासीन् महाभारतन्नाम तद् युद्धम् ? अहो, कीदृशं पीडाप्रदम् तत्स्मरणमपि ! मुने, नाहं शक्तोऽस्मि अग्रे वर्णयितुम्, नाहं शक्तोऽस्मि ! शरीरे मे पौनःपुन्येन रोमहर्षो जायते। महर्षे, नेदं राज्यं सुखकरन्नाम, कदापि न, कथमपि न! देवर्षे, मम शिरसि राजमुकुटमिदं न रत्नजटितं परं रक्तबिन्दुरञ्जितम्। भगवन्, स्मरामि यदस्माभिरस्माकं भ्राता कर्णोऽसहायः, एकाकी च व्यापादितः। घोरं पापमिदम्। पितामहो भीष्मोऽपि अन्यायेनैव घातितः शिखण्डिनमग्रे कृत्वा ! आम् एवमेव ! भोः, मम पुरत इव वर्तते तस्य बाणविद्धं शरीरम्। कथं विस्मरामि ? कथं विस्मरामि ? महर्षे, तत् सर्वं स्मृत्वा मम हृदयं पुनः पुनः कम्पते।

पुण्यात्मा भूरिश्रवा अपि कालवशं नीतस्तदैव यदासौ ध्यानमग्न आसीत्, अतीव गर्हितं कृत्यमिदं वीराणां कृते। पुनर्वेपते मम शरीरम्। नाहन्निरोद्धुं पारयामि ! भोः ! अस्माकमसौ महानाचार्यः युद्धविद्या-निपुणश्च गुरुवरो द्रोणाचार्यः, मुने, जानासि कथमसौ व्यापादितो रणाङ्गणे? अहो वत ! महत्पापं कृतमस्माभिः। कथयामि मन्दभाग्यः, छलेन मिथ्या-भाषणेन च मयैव, आम्, मया-एव मृषाभाषितन्तत्र – 'अश्वत्थामा हतो, नरो वा, कुञ्जरो वा' इति ! अहमेव गुरुघाती ! मम कर्णे कश्चित् कथयतीव-अहमेव गुरुघाती-इति। भोः भोः, पातय मां पातय, अहमेव नराधमः। नीचः, नीचोऽहम्। शान्तं पापम्, शान्तं पापम्। मम कण्ठो रुद्धः। नाहं पारयामि स्थातुमत्र, क्व यामि? मृत्युलोकमेव गच्छामि, आम्, तत्रैव गत्वा तपश्चरिष्यामि, प्रायश्चित्तं वा विधास्यामि। गुरुं हत्वा कथमहं धर्मराजः? अहन्तु अधर्मराजस्तदा प्रभृति। तमाचार्यप्रवरं हत्वा किमर्जितमस्माभिः? किञ्च दत्तं स्वोत्तराधिकारिभ्यः! अहमवश्यमेव प्रेषणीयस्तस्मिन्नेव घोरे रौरवे नरके यत्रोषित्वा चिर-कालं यावत् स्वकुकृत्यानां प्रायश्चित्तं विधास्यामि ! भोः ! त्वरया प्रेष्यतामहं तत्रैव ! भोः अयं कुत्सितो वृत्तान्तः कथं बिस्मृतिगर्भे पतेत् ! आगच्छ विस्मृते, आगच्छ, आलिङ्ग माम्, आच्छादय मम स्मृतिपटलम्।

देवर्षि, इदानीं श्रूयतां सौप्तिकवधस्य निन्दितं तत्कृत्यम् ! परं भगवन्, इदन्तु अश्वत्थम्ना कृतम्। आम् तेनैव गुरुपुत्रेण ! परं........परं कथमागतमिदं मम स्मृति-पटले? अतीव विगर्हितं पाप-पूर्णञ्च कृत्यमासीत् तत्। युद्धनीतेर्विपरीतं छलपूर्णञ्च ! नराधमोऽसौ ! न, न, न, अहमप्यासम्।

सहभागी तत्र ! आम् अहमपि? नाहं विस्मरामि इदम्। अधुनापि न, नैव च विस्मरिष्यामि अग्रेऽपि । अधुनाऽपि मम कर्णयोः तेषां अबोधानां शिशूनां, युवतीनां रोगिणाञ्चार्तनादो भृशं पतति। भोः ! कथं विस्मरिष्यामि ! को रुन्ध्यात् मम कर्णौ ? भोः ! कुत्र यामि यत्र सर्वमिदमपगच्छेत् मम स्मृति-पटलात्।

यथार्थतः मे मृषाभाषणमेव तस्य सौप्तिकवधस्यापि कारणम्। को मां विहायान्यः अत्रापि परमापराधी ? अहो वत ! महत्पापमिदमपि ! वस्तुतो मम धार्मिकता पाखण्ड एवासीन्नान्यत्। द्यूतं धर्मश्च कथमेकत्र स्थातुमर्हतः? कथं तर्हि द्यूतसेवी युधिष्ठिरो धार्मिकः, धर्मराजश्च भवितुं योग्यः? तदेव द्यूतमासीत् कारणन्तन्नरसंहारस्य !

आम्, आम् - इयमपि संस्मर्यते सा व्यङ्गोक्तिः पाञ्चाल-सुतायाः। एषाऽपि कारणमासीत् तस्य घोरनरसंहारस्य ! ओः ! ओः ! कीदृशं मर्मस्पृक् दृश्यमासीत् दुर्योधनस्य मृत्योरनन्तरम्। अतीव पीडाजनकं सर्वम्-यदा क्रन्दमानौ ज्येष्ठपितृव्यौ तत्र येन केन प्रकारेणानीतौ, तदा तत्रत्याया भूमेः प्रत्येकः कणश्चीतकारमिव कुर्वन् प्रतीयते स्म। कीदृशमुग्रमासीत्तन्ममत्वम्। भोः, पितृव्य, त्वमपि क्षमां कुरु। नात्र मे दोषः। नियतिरेवेदृशी दुर्दान्तासीत्। तदा पितृव्यः रोष-विविशो ज्येष्ठमासस्य भानुरेव प्रतीयते स्म। असौ यदि अन्धो नाभविष्यत्तदा का गतिरभविष्यद् भीमसेनवपुषः ? न जाने, स्मृत्वापि कम्पते मम हृदयम्! यदि सा पितृव्या गान्धारी क्रोधावेशेन वेपमाना स्वरोषपूर्णे नेत्रे मयि प्रत्यावर्त्तयिष्यत्तदाहं भस्मावशेष एवाऽभविष्यम्। तस्या वस्त्रपट्टिकाच्छदनरहितं नेत्रयुगलं यदा तया परतः क्रियते स्म तदा या कृशानुकणिका पतितासीत् तया दग्धो मम पादाङ्गुष्ठोऽधुनापि भृशमवसीदति। भो कष्टम् ! अहो मर्म-स्पर्शि ममत्वमपि कीदृशं भवति ! साश्रुधारा पितृव्ययोर्नेत्राणां स्पष्टमेवावलोक्यतेऽद्यापि। किं करोमि भोः ? क्व गच्छामि ? पतितोऽस्मि दुःखसागरे ! स्मरामि, एवमेव मया अभिमन्यो द्रौपदीपुत्राणाञ्च मृत्युसमयेऽपि शतशोऽश्रुधारा अवलोकिताः सर्वेषां नेत्रेभ्यो निष्पतन्त्यः।

आम्, मया कातरेणैव प्रेषितो बालकोऽभिमन्युरपि युद्धार्थम्, स्मरामि, मयैव।

सत्यम्, सर्वथा सत्यम्, अहमेवापराधी सर्वेषां घोराणामनर्थानाम्। कथं न गच्छेयं घोरतमे नरके ? मया तु कुम्भीपाके गन्तव्यम् ! कुतः क्षमादानमधुना ? कस्माच्च ? कुत्र गच्छामि ? हा वसुन्धरे, भण, भोः, आकाश ! देहि प्रतिवचनम्। दिशः, कथं मौनं समाचरथ, उच्चरत, उच्चरत, उच्चरत भोः ! इति।

—४६/५ रूपनगरम्
जम्मू-१८००१३